# BK BIRLA CENTRE FOR EDUCATION

**SARALA BIRLA GROUP OF SCHOOLS**
**SENIOR SECONDARY|CO-ED DAY CUM BOYS' RESIDENTIAL SCHOOL**
**MID-TERM_EXAMINATION 2024-25**
**SANSKRIT (119)**

Class : VIII — Duration : 3 Hrs
Date : 14.09.2024 — Max. Marks : **80**
Admission No.: — Roll No.:

---

**सामान्य निर्देशाः –**

- कृपया सम्यकतया परीक्षणं कुर्वन्तु अस्मिन् प्रश्नपत्रे षोडश् प्रश्नाः सन्ति।
- उत्तर लेखनात् पूर्वं प्रश्नस्य क्रमांकः अवश्यमेव लेखनीयः।
- प्रश्नस्य क्रमांकः प्रश्नपत्रानुसारम् एव लेखनीयः।
- निर्देशानुसारं सर्वेषां प्रश्नानाम् उत्तराणि लेखनीयानि।
- प्रश्नानां निर्देशाः ध्यानेन पठनीयाः।

---

**(खण्ड क)**

**अपठितावबोधनम् (10 अंकात्मकः)**

**प्रश्न 01 अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानामुत्तराणि संस्कृतेन लिखत –**
(नीचे लिखे गद्यांश को पढ़कर दिए प्रश्नों के उत्तर संस्कृत में लिखिए।)

धौम्य ऋषेः आरूणिः नाम् शिष्यः आसीत्। सः परिश्रमी आज्ञापालकः शिष्यः आसीत्। तस्य स्वभावः विनम्रः सरलः च आसीत्। एकदा गुरोः आज्ञा अनुसारं जलं रोद्धुं कृषिक्षेत्रं गतवान्। जलं रोद्धुं सः स्वशरीरम् एव बन्धस्थाने अस्थापयत्। अगामि दिवसे यदा गुरूः तम् अन्वेषयन् तत्र अगच्छत् तदा सः तम् अचेतं प्राप्नोत्। सम्पूर्णां वार्तां श्रुत्वा गुरूः धौम्यः तं वरम् अयच्छत्। सः एव आरुणिः अनन्तरम् प्रसिद्धः ऋषिः अभवत्। आरुणिः स्वकार्यैः धौम्यस्य कीर्तिं चतुर्ष दिशासु प्रकाशितम् अकरोत्। भारतं तं पुत्रं सदा स्मरिष्यति।

**(अ) एकपदेन उत्तरत –** (केवलं प्रश्नद्वयम्) **(1×2=2 अंकौ)**

(1) आरुणिः कस्य शिष्यः आसीत् ?
(2) आरुणिः जलं रोद्धुं कुत्रं गतवान ?
(3) आरुणिः स्वकार्यैः कस्य कीर्तिं चतुर्ष दिशासु प्रकाशितम् अकरोत ?

**(ब) पूर्णवाक्येन उत्तरत –** (केवलं प्रश्नद्वयम्) **(2×2=4 अंकाः)**

(1) जलं रोद्धुं सः किं बन्धस्थाने अस्थापयत् ?
(2) तस्य स्वभावः कथम् आसीत ?
(3) सः कदा तम् अचेतं प्राप्नोत ?

**(स) अस्य अनुच्छेदस्य कृते उचितं शीर्षकं संस्कृते लिखत।** **(1×1=1 अंकः)**

**(द) यथानिर्देशं उत्तरत –** (केवलं प्रश्नत्रयम्) **(1×1=3 अंकाः)**

(1) गुरू शब्दस्य विलोमपदं गद्यांशे कि प्रयुक्तम् ?
(क) उद्यमी (ख) अतीव (ग) सरलः (घ) शिष्यः

(2) तस्य स्वभावः विनम्रः सरलः च आसीत्।। वाक्ये तस्य कः अस्ति ?
(क) गुरूः (ख) आरुणिः (ग) कृषिः (घ) ऋषिः

(3) प्रसिद्धः इति शब्दे कः उपसर्ग अस्ति ?
(क) प्र (ख) सिद्ध (ग) प्रसि (घ) द्ध

(4) अगच्छत्' इति शब्दस्य वर्तमानकाल रूपं किम् ?
(क) गच्छति (ख) गमिष्यति (ग) गच्छतु (घ) अगच्छन्

## (खण्ड ख)

## रचनात्मककार्यम् (15 अंकात्मकः)

**प्रश्न 02 भवान् राकेशः/सोनाली भवतः/भवत्याः विद्यालयः छात्रान् शिक्षायात्रायै जयपुरम् नेष्यति। पितुः आज्ञा प्राप्त्यर्थं लिखिते पत्रे रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत –**

आप राकेश/सोनाली हैं। आपका विद्यालय छात्रों को शिक्षायात्रा में जयपुरम् लेकर जाएगा। पिता की आज्ञा प्राप्त करने के लिए लिखे पत्र में मंजूषा से रिक्तस्थान भरकर उत्तरपुस्तिका में पुनः लिखिए– **(1/2×10=5 अंकाः)**

टैगोर छात्रावासतः

दिनांकः –

आदरणीयः **(1)** –––––––

सादरं **(2)** –––––––।

अत्र कुशलं **(3)** –––––––

भवतः पत्रं प्राप्तम्। गृहस्य समाचाराः ज्ञाताः। मम् **(4)** ––––––– उत्तमं चलति। मम विद्यालयः **(5)** ––––––– शिक्षायात्रायां जयपुरम् नेष्यति। अहम् अपि **(6)** ––––––– दृष्टुम् इच्छामि। **(7)** ––––––– भवान् अनुमतिं ददाति चेत् गन्तुं शक्नोमि। कृपया **(8)** ––––––– विद्यालयं प्रति प्रेषयन्तु। मम समीपे धनम् नास्ति तर्हि **(9)** ––––––– रूप्यकाणि अपि प्रेषयन्तु। शेषं सर्वं कुशलम्। मात्रे नमः, अनुजाय च स्नेहः।

भवताम् **(10)** –––––––

राकेश/सोनाली

| |
|---|
| **मंजूषा –** पंचशत, पुत्रः/पुत्री, जयपुरं यदि, अध्ययनं, दीपावलीअवकाशे, तत्रास्तु, प्रणमामि, पिताश्री, अनुमतिपत्रं |

**प्रश्न 03 मम प्रिय आचार्यः इति विषयम् अधिकृत्य मंजूषातः शब्दान् चित्वा संस्कृतभाषया पंचवाक्यानि रचयत–** **(5 अंकाः)**

मम प्रिय आचार्यः इस विषय पर कोष्ठक से शब्द चुनकर संस्कृतभाषा में पाँच वाक्य लिखिए –

| |
|---|
| **मंजूषा –** मम् वदति उत्तमः आचार्यः अस्ति सः पाठयति उत्तमं सः सद्कर्म सर्वदा वदति कर्तुं सः सुंदरं व्यवहारं कर्तुं अध्यापकः सः मम प्रिय त्यागशीलः अस्ति सः अस्ति |

**अथवा**

**चित्रं दृष्ट्वा मंजूषायाः सहायतया पंचवाक्यानि लिखत –**

चित्र को देखकर मंजूषा की सहायता से पाँच वाक्य लिखिए –



| **मंजूषा** |
|---|
| चित्रम्, वर्तते, अस्ति, उद्यानस्य, उद्यानं, उद्याने, वृद्धौ, खेलतः, वार्तालापं, सुंदरं, कुरूतः, छात्राः, पिच्छकन्दुकं, पादकन्दुकं, क्रीडन्ति, द्वौ, बालकौ |

(1) ––––––––––––––––––––––––––––––

(2) ––––––––––––––––––––––––––––––

(3) ––––––––––––––––––––––––––––––

(4) ––––––––––––––––––––––––––––––

(5) ––––––––––––––––––––––––––––––

**प्रश्न 04 मंजूषायां दत्तैः शब्दैः कथां पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत –** **(5अंकाः)**

मंजूषा में दिए शब्दों के द्वारा कथा को पूर्ण करके उत्तर पुस्तिका में पुनः लिखिए –

**(1)** –––––––ग्रामे एकः काष्ठविक्रेता आसीत्। सः वनं गत्वा काष्ठं कर्तयति नगरे च विक्रयति स्म। तेन तस्य **(2)** ––––––– पालन–पोषणं च भवति स्म। एकदा सः नदी तटे वृक्षस्य **(3)** ––––––– कर्तयति स्म, तदा तस्य परशु नद्यां अपतत्। सः रोदनम् आरब्धवान्। नदीजलात् एका देवी बहिः आगच्छति पृच्छति च भवान् किमर्थं रूदति ? काष्ठविक्रेता अवदत् – मम **(4)** ––––––– नद्यां अपतत् अतः अहं रोदनं करोमि। देवी अवदत् – तिष्ठ अहं भवतः परशुं **(5)** ––––––– । सा **(6)** ––––––– स्वर्ण परशुम् आनीय काष्ठविक्रेतं पृष्ठवती एषः स्वर्ण परशुः भवतः अस्ति ? काष्ठविक्रेता अवदत् – न । सा पुनः जलात् रजत परशुम् अनीय काष्ठविक्रेतं पृष्ठवती एषः रजत परशुः भवतः अस्ति ? **(7)** ––––––– पुनः अवदत् – न, मम तु लौहपरशुः अस्ति। सा पुनः जलात् **(8)** ––––––– परशुम् अनीय काष्ठविक्रेतं पृष्ठवती एषः लौहपरशुः भवतः अस्ति ? काष्ठविक्रेता प्रसन्नः भूत्वा **(9)** ––––––– – आम्। देवी प्रसन्ना भूत्वा **(10)** ––––––– परशुः काष्ठविक्रेतां दत्वा गतवती।

| **मंजूषा** |
|---|
| काष्ठविक्रेता, लौहस्य, आनयामि, परशु, त्रयमपि, अवदत्, एकस्मिन्, परिवारस्य, जलात्, शाखां |

**अथवा**

**मंजूषातः उचितानि पदानि चित्वा संवादं प्रपूर्य उत्तरपुस्तिकायां पुनः लिखत –**

मंजूषा से उचित शब्द को चुनकर संवाद को पूर्ण करके उत्तर पुस्तिका में पुनः लिखिए –

वैद्यः – वदतु किं कष्टम् अस्ति ?

रोगिः – **(1)** ––––––––––––––––––।

वैद्यः – पीड़ा कुत्र वर्तते ?

रोगिः – **(2)** ––––––––––––––––––।

वैद्यः – ह्यः किं किं खदितवान् ?

रोगिः – ह्यः **(3)** ––––––––––––––––––––––।

वैद्यः – पश्यतु, क्षुधानुसारम् एव खादनीयम्। अतिभोजनं रोगजनकं एव भवति।

रोगिः – **(4)** ––––––––––––––––––––––––––––––––––––––––––––।

वैद्यः – एताः चतस्रः गोलिकाः स्वीकरोतु। ऊष्णजलेन प्रातः शायं खादतु।

रोगिः – **(5)** ––––––––––––––––––––––––––––––––––––।

वैद्यः – किमपि न, केवलं ऊष्णं जलम् एव पिबतु।

रोगिः – अस्तु धन्यवादः। भवान् यथा आदिशति तथा एव करिष्यामि।

| **मंजूषा** |
|---|
| 1, सत्यम्, इदानीं औषधं ददातु। इतः परम् कदापि अतिभोजनं न करिष्यामि। |
| 2, एकस्मिन् विवाहभोजं गत्वा बहूनि व्यंजनानि खादितवान् |
| 3, भोः वैद्य महोदय! अत्यधिका पीड़ा वर्तते। |
| 4, भोजने किं खदामि। |
| 5, मम उदरे पीड़ा वर्तते। |

## (खण्ड ग)

## अनुप्रयुक्तव्याकरणम् (24 अंकात्मकः)

**प्रश्न 05 मंजूषायां दत्तैः उचितैः अव्ययपदैः रिक्त स्थानानि पूरयित्वा वाक्यानि लिखत – (1×5=5 अंकाः)**

कोष्टक में दिए उचित अव्ययपदों से रिक्तस्थानों को भरकर वाक्यों को पूरा करके लिखिए।

| **मंजूषा –** सदा, एव, एकदा, उच्चैः, यथा तथा, |
|---|

(क) ––––– रामरावणयोः युद्धं भवति।

(ख) ––––– सत्यं वचनं वदतु।

(ग) ––––– राजा भवति ––––– प्रजा भवति।

(घ) सिंहः –––––– गर्जति।

(ङ) अहं संस्कृतम् ––––– वदामि।

**प्रश्न 06 प्रकृति प्रत्ययं योजयित्वा उचितम् उत्तरं चिनुत – (पंचप्रश्नाः) (1×5=5 अंकाः)**

प्रत्यय और मूल शब्दों को जोड़कर उचित उत्तर चुनकर लिखिए (कोई पाँच)

(1) रमा पाठं **(लिख्+क्त्वा)** –––– शयनं करोति।

(क) लेखितुम् (ख) लेखनाय (ग) लिखितः (घ) लिखित्वा

(2) बालकः **(खेल्+तुमुन्)** –––– क्रीडांगनं गच्छति।

(क) खेलितः (ख) खेलितुम् (ग) खेल्य (घ) खेलित्वा

(3) माता उपहारं **(स्वी+कृ+ल्यप्)** –––– प्रसन्ना अस्ति।

(क) स्वीकृत्वा (ख) स्वीकर्तुम् (ग) स्वीकृतः (घ) स्वीकृत्य

(4) छात्रेण पाठः **(पठ्+क्त्)** ––––।

(क) पठितः (ख) पठितवान् (ग) पठितुम् (घ) पठित्वा

(5) शिक्षकः प्रश्नस्य उत्तरं **(लिख्+क्तवतु)** –––– ।

(क) लिखितवान् (ख) लिखितः (ग) लिखित्वा (घ) लेखितुम्

(6) छात्रः विद्यालयं **(गम्+क्त्वा)** –––– अध्ययनं करोति।

(क) गम्य (ख) गत्वा (ग) गतः (घ) गन्तुम्

**प्रश्न 07 निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत – (प्रश्नचतुष्टयम्) (1×4=4 अंकाः)**

निर्देश के अनुसार उचित उत्तर चुनकर लिखिए (कोई चार)

(1) **बालक** शब्दस्य तृतीया विभक्तिः एकवचनम् किम् ?

(क) बालकः (ख) बालकस्य (ग) बालकेन (घ) बालके

(2) **नदी** शब्दस्य सप्तमी विभक्तिः द्विवचनम् किम् ?

(क) नदीम् (ख) नद्याम् (ग) नद्योः (घ) नदीनाम्

(3) **अस्मद्** शब्दस्य षष्ठी विभक्तिः एकवचनम् किम् ?

(क) अहम् (ख) मम् (ग) आवयोः (घ) अस्माकम्

(4) **युष्मद्** शब्दस्य द्वितीया विभक्तिः बहुवचनम् किम् ?

(क) युवाम् (ख) त्वाम् (ग) युष्मान् (घ) युवयोः

(5) **रमा** शब्दस्य चतुर्थी विभक्तिः बहुवचनम् किम् ?

(क) रमायै (ख) रमाभ्याम् (ग) रमाभ्यः (घ) रमायाः

**प्रश्न 08 निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत – (प्रश्नचतुष्टयम्) (1×4=4 अंकाः)**

निर्देश के अनुसार उचित उत्तर चुनकर लिखिए (कोई चार)

**(1) गम्** धातोः लट्लकारस्य वर्तमानकालस्य उत्तमपुरुषस्य एकवचनम् किम् ?

**(क)** पठन्ति **(ख)** पठसि **(ग)** पठामि **(घ)** पठति

**(2) पठ्** धातोः लङ्लकारस्य भूतकालस्य अन्यपुरुषस्य बहुवचनम् किम् ?

**(क)** अपठत् **(ख)** अपठताम् **(ग)** अपठः **(घ)** अपठन्

**(3) कृ** धातोः लृट्लकारस्य भविष्यकालस्य मध्यमपुरुषस्य द्विवचनम् किम् ?

**(क)** करिष्यसि **(ख)** करिष्यथः **(ग)** करिष्यन्ति **(घ)** करिष्यथः

**(4) लिख्** धातोः लोट्लकारस्य आज्ञार्थकस्य अन्यपुरुषस्य एकवचनम् किम् ?

**(क)** लिख **(ख)** लिखतु **(ग)** लिखताम् **(घ)** लिखन्तु

**(5) गम्** धातोः विधिलिङ्लकारस्य कामनार्थकस्य उत्तमपुरुषस्य एकवचनम् किम् ?

**(क)** गच्छेयम् **(ख)** गच्छेव **(ग)** गच्छेम **(घ)** गच्छेत्

**प्रश्न 09 निर्देशानुसारम् अनुवादं कृत्वा उत्तरपुस्तिकायां लिखत – (षड् प्रश्नाः) (1×6=6 अंकाः)**

निर्देश के अनुसार अनुवाद करके उत्तरपुस्तिका में लिखिए (कोई छः)

**(1)** अहम् संस्कृतं पठामि। (हिन्दी भाषायाम्)

**(2)** वयं भारतस्य विषये पठितुम् इच्छामः। (हिन्दी भाषायाम्)

**(3)** भारतं प्रगतिशीलम् अस्ति। (हिन्दी भाषायाम्)

**(4)** छात्र नियमों का पालन करें। (संस्कृत भाषायाम्)

**(5)** जीवन में अनुशासन महत्त्वपूर्ण है। (संस्कृत भाषायाम्)

**(6)** पका भोजन दोपहर में खाना चाहिए। (संस्कृत भाषायाम्)

**(7)** कल चिरायु नहीं आया। (संस्कृत भाषायाम्)

## (खण्ड घ)

## पठितावबोधनम् (31 अंकात्मकः)

**प्रश्न 10 अधोलिखितं नाट्यांशं पठित्वा प्रदत्त प्रश्नानामुत्तराणि संस्कृतेन लिखत –**

(नीचे लिखे नाट्यांश को पढ़कर दिए प्रश्नों के उत्तर संस्कृत में लिखिए।)

ध्रुवः – अस्माकं राष्ट्रप्रतीकानि कानि सन्ति।

शिक्षकः– राष्ट्रध्वजः त्रिरंगः, राष्ट्रियचिह्नं अशोकस्तम्भः, राष्ट्रगानं च जन–गण–मन अस्ति। कमलपुष्पं, वटवृक्षः, व्याघ्रः, मयूरः, डॉल्फिनमत्स्यः, गंगानदी, आम्रफलं चापि राष्ट्रप्रतीकानि सन्ति।

निलयः – अस्माकं संस्कृतिः कीदृशी अस्ति ?

शिक्षकः – विश्वबन्धुत्वभावनया युक्ता संसारस्य समस्त संस्कृतिषु भारतीया संस्कृतिः मूर्धन्यास्ति। शिक्षायां ज्ञानेविज्ञाने च भारतं सर्वदा अग्रसरं विद्यते। प्राचीनकाले नालन्दा, तक्षशिला इत्यादयः विश्वविद्यालयाः सम्पूर्णे देशे अतीव प्रसिद्धाः आसन्। आधुनिक वैज्ञानिक युगेऽपि चिकित्साशास्त्रे संगणकविद्यायां अन्येषु च वैज्ञानिक क्षेत्रेषु भारतीयाः समग्रविश्वे प्रमुखाः सन्ति।

छात्राः – आचार्य भारतस्य कः कः सहायकः ?

शिक्षकः– साधुं पृष्टम्, वयं सर्वे सहायकाः स्मः।

छात्राः – वयम् अपि ?

शिक्षकः – आम। सर्वे जनाः स्वहितं त्यक्तवा देशस्य हिताय चिन्तयन्तु। स्वच्छतायाः ध्याने कुर्वन्तु। छात्राः अपि नियमान पालयन्तु सम्यक् अध्ययनं च कुर्वन्तु। एवं भवन्तः भारतस्य प्रगत्यां सहायकाः भविष्यन्ति।

मूल्यम् – वयं जागरित्वा राष्टस्य प्रगत्यां सहायकाः स्याम।

(अ) **एकपदेन उत्तरत** – (केवलं प्रश्नद्वयम्) **(1/2×2=1 अंकः)**

(1) जनाः किं त्यक्त्वा देशस्य हिताय चिन्तयन्तु ?

(2) भारतं कुत्र अग्रसरं विद्यते ?

(3) छात्राः अपि कान् पालयन्तु ?

(ब) **पूर्णवाक्येन उत्तरत** – (केवलं प्रश्नद्वयम्) **(1×2=2 अंकौ)**

(1) अस्माकं संस्कृतिः कीदृशी अस्ति ?

(2) भारतस्य कः कः सहायकः ?

(3) प्राचीनेकाले के विश्वविद्यालयाः प्रसिद्धाः आसन् ?

(स) **यथानिर्देशं उत्तरत** – **(1×2=2 अंकाः)**

(1) भवन्तः भारतस्य प्रगत्यां सहायकाः भविष्यन्ति। रेखांकिते शब्दे किं वचनम् अस्ति ?

(क) एकवचनम् (ख) द्विवचनम् (ग) बहुवचनम् (घ) अन्यवचनम्

(2) देशस्य हिताय चिन्तयन्तु। रेखांकिते शब्दे का विभक्तिः अस्ति ?

(क) प्रथमा (ख) तृतीया (ग) चतुर्थी (घ) षष्ठी

**प्रश्न 11 अधोलिखितं पद्यांशं पठित्वा प्रदत्त प्रश्नानामुत्तराणि संस्कृतेन लिखत –**

(नीचे लिखे पद्यांश को पढ़कर दिए प्रश्नों के उत्तर संस्कृत में लिखिए।)

शान्तितुल्यं तपो नास्ति न सन्तोषात् परं सुखम्
न तृष्णायाः परो व्याधिः न च धर्मो दयापरः।।

(अ) **एकपदेन उत्तरत** – (केवलमेकंप्रश्नम्) **(1×1=1 अंकः)**

(1) केन तुल्यं तपः नास्ति ?

(2) कस्मात् परं सुखं नास्ति ?

(ब) **पूर्णवाक्येन उत्तरत** – (केवलं प्रश्नद्वयम्) **(1×2=2 अंकौ)**

(1) कस्याः परो व्याधिः नास्ति ?

(2) कस्याः परः धर्मः नास्ति ?

(स) **यथानिर्देशं उत्तरत** – **(1×2=2 अंकौ)**

(1) शान्तितुल्यं तपो नास्ति। वाक्येस्मिन् क्रियापदं किम् ?

(क) शान्ति (ख) तुल्यं (ग) तपो (घ) नास्ति

(2) **असन्तोषात्** इतिपदस्य विलोमपदं पद्यांशे किम् प्रयुक्तम् ?

(क) तृष्णायाः (ख) संतोषात् (ग) शान्तितुल्यं (घ) दयापरः

**प्रश्न 12 अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानामुत्तराणि संस्कृतेन लिखत –**

(नीचे लिखे गद्यांश को पढ़कर दिए प्रश्नों के उत्तर संस्कृत में लिखिए।)

विवेकः प्रतिभा च स्वास्थ्यप्रदे पुष्टिदं भोजनं कुरुतः। तौ यथेच्छं पयः पिबतः। स्वच्छानि परिधानि परिधार्य तौ मातरं पितरं च प्रणम्य पठनाय स्वविद्यालयं गच्छतः। तौ विद्यालयतः आगत्य किंचित् विश्रामं कृत्वा स्वगृहकार्यं कुरुतः। तत्पश्चात सायं स्वमित्रैः सह क्रीडतः। कला एका स्वस्था आदर्शभूता च गृहणी अस्ति। सा सदा स्वकार्याणि सम्पादयति, पत्युः सन्तानयोः च स्वास्थ्यविषये सावधाना वर्तते। पतिः जगत्पालः अपि स्वपत्नीं कलां बहुमन्यते। अनेने प्रकारेण परस्पर स्नेह–सौहार्द्रबद्धः अयं परिवारः एकः आदर्श परिवारः अस्ति। लघु परिवारः एव सुखी परिवारः भवति। आहारस्य वस्त्रस्य गृहस्य च व्यवस्था लघुपरिवारे एव समुचितरूपेण भवति।

लघुपरिवारेणैव समाजस्य राष्ट्रस्य च कल्याणं भवितुम् अर्हति।

(अ) **एकपदेन उत्तरत** – (केवलं प्रश्नद्वयम्) **(1/2×2=1 अंकः)**

(1) विवेकः प्रतिभा च सायं कैः सह क्रीडतः ?

(2) पतिः जगत्पालः कां बहुमन्यते ?

(3) कला कीदृशी गृहणी अस्ति ?

(ब) **पूर्णवाक्येन उत्तरत** – (केवलं प्रश्नद्वयम्) **(1×2=2 अंकौ)**

(1) कस्य व्यवस्था लघुपरिवारे एव समुचितरूपेण भवति ?

(2) राष्ट्रस्य च कल्याणं कुत्र भवितुम् अर्हति ?

(3) विवेकः प्रतिभा च कथं भोजनं कुरुतः ?

**(स) यथानिर्देशं उत्तरत –** **(1×2=2 अंकौ)**

(1) तौ मातरं पितरं च प्रणम्य पठनाय गच्छतः। वाक्ये प्रत्ययपदं किम् ?

**(क)** तौ **(ख)** मातरं पितरं च **(ग)** प्रणम्य **(घ)** पठनाय

(2) **दुखी** शब्दस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् –

**(क)** आदर्शः **(ख)** सुखी **(ग)** लघु **(घ)** दीर्घः

**प्रश्न 13 अधोलिखितप्रश्नानामुत्तराणि संस्कृतेन लिखत – (पंच प्रश्नाः)** **(1×5=5 अंकाः)**

(नीचे लिखे प्रश्नों के उत्तर संस्कृत में लिखिए।) (कोई पाँच)

**(क)** उत्तमजनाः कथं भवन्ति ?

**(ख)** पृथिव्यां कानि रत्नानि भवन्ति ?

**(ग)** व्यवहारेण के जायन्ते ?

**(घ)** सर्वदा कान् अर्चयेयुः ?

**(ङ)** कदा गृहकार्यं कुर्युः ?

**(च)** भारतीयाः कुत्र प्रमुखाः सन्ति ?

**प्रश्न 14 रेखांकितान् शब्दान् आधृत्य प्रश्ननिर्माणं कुरुत – (पंच प्रश्नाः)** **(1×5=5 अंकाः)**

(रेखांकित शब्दों के आधार पर प्रश्ननिर्माण कीजिए) (कोई पाँच)

**(क)** धेनुः <u>दुग्धं</u> ददाति।

**(ख)** जगत्पालः <u>कलां</u> बहुमन्यते।

**(ग)** निम्नजनाः <u>विघ्नभयेन</u> कार्यारम्भं न कुर्वन्ति।

**(घ)** <u>व्यवहारेण</u> रिपवः जायन्ते।

**(ङ)** भारतं <u>ज्ञानस्य</u> प्रकाशं निरन्तरं प्रसारयति।

**(च)** शुद्धं भोजनं <u>स्वास्थ्याय</u> आवश्यकम् अस्ति।

**प्रश्न 15 श्लोकांशान् यथायोग्यं मेलयत –** **(4 अंकाः)**

(श्लोक के अशों का उचित मिलान कीजिए)

| क | ख |
|---|---|
| सम्पत्तौ च विपत्तौ च | विरमन्ति मध्याः |
| उदये सविता रक्तो | विघ्न भयेन नीचैः |
| शोको नाशयते धैर्यं | रक्तश्चास्तं गते यथा |
| शोको नाशयते सर्वं | मित्राणि रिपवस्तथा |
| न कश्चित् कस्यचिन्मित्रं | नास्ति शोकसमो रिपुः |
| व्यवहारेण जायन्ते | शोको नाशयते श्रुतम् |
| प्रारभ्यते न खलु | न कश्चित् कस्यचिद्रिपुः |
| प्रारभ्य विघ्नविहिताः | महतामेक रूपता |

**प्रश्न 16 प्रदत्तस्य श्लोकस्य अन्वयं प्रपूर्य लिखत –** **(2 अंकौ)**

(दिए श्लोक के अन्वय में रिक्तस्थान भरकर उत्तर पुस्तिका में लिखिए)

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते।।

**अन्वयः–** पृथिव्यां ---- ------ ------ त्रीणि रत्नानि सन्ति।
मूढैः ------ रत्नसंज्ञा -------।

------------------**इत्यलम्**------------------